चतुर्दशः पाठः

# वाराणसी नगरी



अस्माकं देशे बहूनि तीर्थस्थानानि सन्ति। तेषु वाराणसी एकं प्रसिद्धं तीर्थस्थानम् अस्ति। इदं काशीनाम्नापि प्रसिद्धं वर्तते। अनेकेषु प्राचीनग्रन्थेषु अस्य महिमा वर्णितः। स्कन्दपुराणस्य काशीखण्डे अस्याः वाराणस्याः विस्तरेण वर्णनं विहितम्।इयं नगरी गङ्गायाः पवित्रे तटे विराजमाना अस्ति। अत्रैव विश्वनाथस्य प्रसिद्धं मन्दिरम् अस्ति। अन्यानि अपि बहूनि देवमन्दिराणि सन्ति यथा संकटमोचन-मन्दिरम्, नवीनविश्वनाथ-मन्दिरम्, दुर्गा-मन्दिरम्,कालभैरव-मन्दिरम्, तुलसीमानस-मन्दिरम् च वाराणस्यां गङ्गा उत्तरवाहिनी जाता, तस्याः तीरे अनेके मनोहराः घट्टाः सन्ति। अस्याः प्रसिद्धेषु घट्टेषु दशाश्वमेध-राजेन्द्रप्रसाद-तुलसी-पञ्च गङ्घट्टाः अन्यतमाः सन्ति, यत्र प्रातः सन्ध्याकाले च महान् जनसमुदायः आयाति। तत्र केचन स्नान्ति, केचन सन्ध्यावन्दनं कुर्वन्ति, केचन कथां शृण्वन्ति, केचन नौकासु विहरन्ति च।अत्रैव एकं पिशाचमोचनं नामकं तीर्थमस्ति, यत्र यात्रिणः आगत्य पित§णां श्राद्धक्रियां कुर्वन्ति। शिवरात्रिदिने अत्र विशेषरूपेण मेला लगति। ग्रहणसमये अपि अत्र महान् जनसमुदायः आगच्छति। अत्र गङ्गायां स्नानाय श्रीविश्वनाथस्य दर्शनाय च सदैव भिन्न-भिन्न-प्रदेशेभ्यः जनाः आगच्छन्ति।वाराणसी भारतस्य सुप्रसिद्धं पुरातनं

विद्याकेन्द्रमपि अस्ति। अत्र प्राचीनकालात् पठनपाठनयोः परम्परा राजते। अत्र अनेके विख्याताः पण्डिताः जाताः। अद्यापि अत्रत्यानां पण्डितानां देशे विदेशे प्रतिष्ठा भवति। विश्वविख्यातः काशी-हिन्दू-विश्वविद्यालयः अत्रैव विराजते। संस्कृत-शिक्षायाः प्रसिद्धं केन्द्रं सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः अत्रैव अस्ति।अत्रैव महात्मा-गान्धी-काशी-विद्यापीठम् अपि अत्रैव अस्ति।अत्र अनेकानि पर्यटनस्थलानि सन्ति। विश्वप्रसिद्धं सारनाथस्थितं बौद्धमन्दिरम् इहैव अस्ति। यत्र भगवान् बुद्धः प्रथमं ज्ञानोपदेशं शिष्येभ्यः अददात्। अत्रैव 'भारतमाता' इति नामकं मन्दिरम् अपि अस्ति।वाराणसी अस्माकं पवित्रं तीर्थस्थानम्, विद्यायाः विश्वविख्यातं केन्द्रम्, तुलसीदासस्य, कबीरदासस्य रविदासस्य च साधनाभूमिः तथा मुमुक्षूणां मुक्तिदायिनी नगरी अस्ति।

## शब्दार्थः

**विराजमाना** = स्थित **पुरातनम्** = प्राचीन। **अत्रत्य** = यहाँ के। **अत्रैव** = यहीं। **विराजते** = सुशोभित है। **विस्तरेण**= विस्तार से। **इहैव** = यहीं पर। **मुमुक्षू** = मोक्ष का इच्छुक।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

काशीनाम्नापि स्कन्दपुराणस्य विद्याकेन्द्रमपि

मुमुक्षूणाम् शृण्वन्ति प×चगङ्गाघट्टः

**2. पूर्णवाक्येन उत्तरत -**

(क) इयं नगरी कस्याः पवित्रतटे विराजमाना अस्ति ?

(ख) पितृणां श्राद्धक्रिया कुत्र भवति ?

(ग) भारतमाता-मन्दिरं कुत्र अस्ति ?

(घ) भगवान् बुद्धः शिष्येभ्यः प्रथमज्ञानोपदेशं कुत्र अददात् ?

3. **मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -**

जनसमुदायः विद्याकेन्द्रमपि विश्वनाथस्य मनोहराः काशीखण्डे

(क) स्कन्दपुराणस्य ...................... अस्याः वाराणस्याः विस्तरेण वर्णनं वर्तते।

(ख) अत्रैव .................... प्रसिद्धं मन्दिरम् अस्ति।

(ग) वाराणस्यां गङ्गायाः तीरे अनेके .................... घट्टाः सन्ति।

(घ) ग्रहणसमये अपि अत्र महान् ................... एकत्र भवति।

(ङ) वाराणसी भारतस्य सुप्रसिद्धं पुरातनं ..................... अस्ति।

**4. अधोलिखितानि पदानि आधृत्य वाक्यानि रचयत -**

यथा-फलानि मालाकारः फलानि गृहीत्वा आपणं गच्छति।

(क) तीर्थस्थानानि .................

(ख) बहूनि ..........................

(ग) अनेकानि ................................

(घ) मन्दिराणि ...............................

5. भिन्नवर्गस्य पदं चिनुत- भिन्नवर्गः

***यथा- मयूराः, चटकाः, लताः, शुकाः।*** <u>**लताः**</u>

(क) पुस्तकम्, कलमः, मित्रम्, चित्रम्। ....................

(ख) जलचरः, भूचरः, खेचरः, निशाचरः। ....................

(ग) शिक्षिका, अध्यापिका, उपदेशिका, पुस्तिका। ....................

(घ) तीर्थस्थानानि, घट्टानि, मन्दिराणि, मनोहराणि। ....................

**6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

यथा- वाराणस्यां गङ्गा उत्तरवाहिनी जाता। वाराणस्यां काउत्तरवाहिनी जाता ?

(क) अत्रैव विश्वनाथस्य प्रसिद्धं मन्दिरम् अस्ति।

(ख) शिक्षायाः विश्वविख्यातं केन्दं्र हिन्दूविश्वविद्यालयः अस्ति।

(ग) भगवान् बुद्धः प्रथमं ज्ञानोपदेशं शिष्येभ्यः अददात्।

(घ) वाराणसी अस्माकं पवित्रं तीर्थस्थानम् अस्ति।

**7. उदाहरणानुसारं रूपाणि लिखत -**

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** *पयः* पयसी पयांसि

*यशः* ............ ..............

**द्वितीया** *फलम्* फले फलानि

*वनम्* ............ ..............

**तृतीया** केन काभ्याम् कैः

*तेन* ............ ..............

**चतुर्थी** *मधुने* मधुभ्याम् मधुभ्यः

*वस्तुने* ............ ..............

**पञ्चमी** *वारिणः* वारिभ्याम् वारिभ्यः

*अस्थिनः* ............ ..............

**षष्ठी** *मुखस्य* मुखयोः मुखानाम्

*तृणस्य* ............ ..............

**सप्तमी** *मित्रे* मित्रयोः मित्रेषु

*ज्ञाने* ............ ..............

शिक्षण-सङ्केतः

*(1) अस्मिन् पाठे वर्णितानां विश्वविद्यालयानां मन्दिराणां, प्रमुखघट्टानाच विषये छात्रान् बो*